# নবগ্রহকবচম্

{॥ নবগ্রহকবচম্ ॥}

ব্রহ্মোবাচ ।

শিরো মে পাতু মার্তাণ্ডো কপালং রোহিণীপতিঃ ।

মুখমঙ্গারকঃ পাতু কণ্ঠশ্চ শশিনন্দনঃ ।

বুদ্ধিং জীবঃ সদা পাতু হৃদযং ভৃগুনন্দনঃ ।

জঠরঞ্চ শনিঃ পাতু জিহ্বাং মে দিতিনন্দনঃ ।

পাদৌ কেতুঃ সদা পাতু বারাঃ সর্বাঙ্গমেব চ ।

তিথযোঽষ্টৌ দিশঃ পান্তু নক্ষত্রাণি বপুঃ সদা ।

অংসৌ রাশিঃ সদা পাতু যোগাশ্চ স্থৈর্যমেব চ ।

গুহ্যং লিঙ্গং সদা পান্তু সর্বে গ্রহাঃ শুভপ্রদাঃ ।

অণিমাদীনি সর্বাণি লভতে যঃ পঠেদ্ ধ্রুবম্ ॥

এতাং রক্ষাং পঠেদ্ যস্তু ভক্ত্যা স প্রযতঃ সুধীঃ ।

স চিরাযুঃ সুখী পুত্রী রণে চ বিজযী ভবেত্ ॥

অপুত্রো লভতে পুত্রং ধনার্থী ধনমাপ্নুযাত্ ।

দারার্থী লভতে ভার্যাং সুরূপাং সুমনোহরাম্ ।

রোগী রোগাৎপ্রমুচ্যেত বদ্ধো মুচ্যেত বন্ধনাত্ ।

জলে স্থলে চান্তরিক্ষে কারাগারে বিশেষতঃ ।

যঃ করে ধারযেন্নিত্যং ভযং তস্য ন বিদ্যতে ।

Stotram Digitalized By Sanskritdocuments.org

ব্রহ্মহত্যা সুরাপানং স্তেযং গুর্বঙ্গনাগমঃ ।

সর্বপাপৈঃ প্রমুচ্যেত কবচস্য চ ধারণাত্ ॥

নারী বামভুজে ধৃত্বা সুখৈশ্বর্যসমন্বিতা ।

কাকবন্ধ্যা জন্মবন্ধ্যা মৃতবৎসা চ যা ভবেত্ ।

বহ্বপত্যা জীববৎসা কবচস্য প্রসাদতঃ ॥

ইতি গ্রহযামলে উত্তরখণ্ডে নবগ্রহ কবচং সমাপ্তম্ ।

Encoded and proofread by Ram Sankar Bhattacharya

ramsankar.bhattacharya at gmail.com

Proofread by PSA Easwaran psaeaswaran at gmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ত্oday

http://sanskritdocuments.org

Navagraha Kavacham Lyrics in Bengali PDF
% File name : navagrahakavacham.itx
% Category : kavacha
% Location : doc_z_misc_navagraha
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Ram Sankar Bhattacharya ramsankar.bhattacharya at gmail.com
% Proofread by : Ram Sankar Bhattacharya ramsankar.bhattacharya at gmail.com, PSA Easwaran psaeaswaran at gmail.com
% Description-comments : grahayAmala tantra
% Latest update : August 17, 2013

% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [ October 13, 2015 ] at Stotram Website